शुद्धिकौमुदी

पाठः ९ – २४.०६.२०१७

सुबन्ताः

© All the content in these slides is the intellectual property of Vyoma Linguistic Labs Foundation.
Replication/reuse in any form without express written permission from the organisation is prohibited.

सुबन्ताः

०७. **औत्तरेयाः** हिन्दीभाषया वदन्ति प्रायः ।

’औत्तराहाः’ इति वक्तव्यम् । ’उत्तरादाहञ्’ इति वार्तिकात् आहञ् उत्तरशब्दात् । उत्तरशब्दात् ढकि औत्तरेयः इति रूपं तु भवति । किन्तु, ढक् अपत्यार्थकः । अतः उत्तरायाः अपत्यम् इति अर्थः सिद्ध्यति । स च अर्थः अत्र न अभिप्रेतः ।

एवं, ’वाराणसेयः’ इति शब्दोऽपि (’नद्यादिभ्यो ढक् – पा.सू. ४.१.९७) । ’वाराणसीयः’ इति तु दोषाय ।

०८. एषा **राष्ट्रीया** समस्या अस्ति ।

’राष्ट्रिया’ इति वक्तव्यम् । राष्ट्रशब्दात् ’राष्ट्रावारपाराद्घखौ’ (पा.सू. ४.२.९३) इति सूत्रेण ’घ’प्रत्ययः । घस्य इयः ’आयनेयीनीयियः..’ (पा.सू. ७.१.२) इति सूत्रेण । तस्मात्, ’राष्ट्रियः’ इति रूपस्य सिद्धिः । केचन – ’वृद्धाच्छः’ (पा.सू. ४.२.११४) इति सूत्रेण छप्रत्ययः अपि भवति । छस्य ईयः । तस्मात्, ’राष्ट्रीयः’ इत्यपि सिद्धम् इति वदन्ति । एतत् असत् । छप्रत्ययः सामान्यतया विहितः । घप्रत्ययः तु विशेषतः विहितः । छघप्रत्यययोः बाध्यबाधकभावः अस्ति एव । अतः, छप्रत्ययं बाधित्वा घप्रत्ययः एव प्रवर्तते । तस्मात्, ’राष्ट्रियः’ इत्येव रूपम् ।

०९. **महाराष्ट्रियाः** मराठीभाषया भाषन्ते ।

'महाराष्टीयाः' इति रूपं साधु । नात्र राष्ट्रशब्दः अस्ति, येन 'राष्ट्रियः' इति इकारस्य ह्रस्वः स्यात् । महाराष्ट्रशब्दः राष्ट्रशब्दात् अन्यः । अतः, न 'घ'प्रत्ययः । अपि तु भावार्थे छप्रत्ययः । 'येन विधिस्तदन्तस्य' (पा.सू. १.१.७२) इति सूत्रस्य बलात् राष्ट्रशब्दस्य यत् विहितं तत् महाराष्ट्रशब्दस्यापि भवति इति न चिन्तनीयम् । 'समासप्रत्ययविधौ प्रतिषेधः' इति वार्तिकेन प्रत्ययविधौ तस्य निषेधात् । 'राष्ट्रावार..' इति सूत्रेण प्रत्ययः खलु विधीयते ? अतः महाराष्ट्रीयः इत्यत्र ईकारः एव ।

एवं राष्ट्रशब्दात् पूर्वं (समासाङ्गत्वेन) किञ्चन पदम् अस्ति चेत्, न घप्रत्ययः अपि तु छप्रत्ययः । तस्मात् न ह्रस्वता । अतः, 'बहुराष्ट्रीया', 'हिन्दुराष्ट्रीया' इत्यादिषु दीर्घः एव । केवलस्य राष्ट्रशब्दस्य प्रयोगे तु ह्रस्वः ।

१०. दुष्टैः जनानां **हत्या** कृता ।

’हननं कृतम्’ इति वक्तव्यम् । स च सुप्युपपदे एव विहितः, न तु निरुपपदे । हत्या इत्यत्र उपपदं किमपि नास्ति । अतः, क्यप् न भवति । ’हनस्त च’ (पा.सू. ३.१.१०८) इति सूत्रस्य वृत्तौ ’सुप्युपपदे’ इति स्पष्टम् उक्तम् । बालमनोरमाटीकायां ’निरुपपदं हत्येति तु असाध्वेव’ इति पङ्क्तिरपि लिखिता । अतः, निरुपपदं ’हत्या’ इति रूपम् असाधु । ’ब्रह्महत्या’, ’आत्महत्या’ इत्यादयः तु साधवः ।

११. आरक्षकभटैः **हन्तकः** मारितः ।

’हन्तकः’ इति अपशब्दः । ’हननकर्ता’ इत्यर्थः अत्र अपेक्षितः । हनधातोः कर्त्त्रर्थे ण्वुल्-प्रत्ययः अत्र कृतः । हनधातोः ण्वुलि ’हनस्तोऽचिण्णलोः’ (पा.सू. ७.३.३२) इति हन्तेः तकारः । ’हो हन्तेः…’ (पा.सू. ७.३.५४) इति कुत्वेन हकारस्य घकारः । ’युवोरनाकौ’ इति ण्वुलवयवभूतस्य वकारस्य अकादेशः । तस्मात्, ’घातकः’ इति रूपं सिध्यति । कर्त्रर्थे तृच्णिनिप्रभृतयः अपि सन्ति । तृचि, ’हन्ता’ इति रूपम् । णिनि ’घाती’ इति । ’हन्तकः’ इति रूपं तु कथमपि न भवति ।

१२. अपत्यहीनाः **वृद्धाप्ये** कष्टम् अनुभवन्ति ।

'वार्धके' इति, 'वार्धक्ये' इति वा वक्तव्यम् । वृद्धः एव वृद्धकः । स्वार्थे कः । वृद्धकस्य भावः वार्धक्यम् । 'गुणवचनब्राह्मणादिभ्यः ष्यञ्' इति सूत्रेण ष्यञ् । वृद्धस्य आप्तुं योग्यं यत्किञ्चित् वृद्धाप्यं भवितुम् अर्हति । स च अर्थः अत्र न अभिप्रेतः । बाल्ययौवनादिः दशाविशेषः अत्र वक्तुम् इष्टः । सः भावार्थकः एव स्यात् ।

वार्धक्यविषये अपरः अपि साधुत्वकथनक्रमः दृश्यते । स च इत्थम् – 'वृद्धस्य भावः वार्द्धकम् । 'द्वन्द्वमनोज्ञादिभ्यश्च' (पा.सू. ५.१.१३३) इति सूत्रेण भावे वुञ् । वार्द्धकम् एव वार्द्धक्यम् । 'चतुर्वर्णादीनां स्वार्थे ष्यञ् वक्तव्यः' इति वार्तिकेन स्वार्थे ष्यञ् । अतः, भावार्थकः वुञ्, वुञर्थकः एव ष्यञ् वा प्रयोक्तव्यः' इति । किन्तु, कौमुद्यां दत्तानि उदाहरणानि पश्यामः चेत्, एतेन क्रमेण समर्थनम् अनुचितम् इति भाति । अतः, अस्माभिः पूर्वदर्शितक्रमः आश्रितः ।

१३. केरलेषु सर्वे **अक्षरस्थाः** एव ।

'अक्षरज्ञाः एव' इति, 'साक्षराः एव' इति इति वा प्रयोक्तव्यम् । यः अक्षरे तिष्ठति सः अक्षरस्थः स्यात् । अत्र तु अक्षरज्ञता अपेक्ष्यते । अतः, 'अक्षरज्ञः' इति प्रयोगः करणीयः । 'साक्षरः' इत्यस्यापि सः एव अर्थः ।

१४. अध्यक्षभाषणं श्रुत्वा सर्वे **सभिकाः** करताडनं कृतवन्तः ।

'सभ्याः' इति वक्तव्यम्' । सभायाम् ये भवन्ति ते इत्यर्थः अत्र अपेक्षितः । सभायां साधवः 'सभ्याः' भवन्ति । सभिकाः नाम द्यूतकाराः । तथा हि कोषः – 'सभिकाः द्यूतकारकाः' इति (अमरः) ।

सभा नाम द्यूतस्थानम् अपि । सभा द्यूतम् आश्रयत्वेन अस्य अस्ति इति सभिकः । एवं सभिकाः भवन्ति द्यूतकाराः । सभायां ये भवन्ति, ते सभ्याः । 'सभासदः सभास्ताराः सभ्याः सामाजिकाश्च ते' इति अमरः । अतः, सभ्यसभिकयोः अर्थभेदं मनसि निधाय शब्दप्रयोगः करणीयः । अन्यथा सम्मानयोग्याः सभ्याः सभिकशब्दप्रयोगेण निन्दिताः स्युः ।

सुबन्ताः

१६. सभायाम् **अनुमानतः** त्रिशतं जनाः आसन् ।

अत्रापि, प्रायः, प्रायेण, प्रायशः इत्यादिषु अन्यतमः शब्दः प्रयोक्तव्यः । 'अनुमानतः' इत्येषः शब्दः अपेक्षितम् अर्थं गनयितुम् असमर्थः । अनुमितेः करणं = हेतुः 'अनुमानम्' इत्येतत् तर्कशास्त्रीयं पारिभाषिकं किञ्चित् पदम् । अनुमानपदस्य यः अर्थः सः अत्र न अभिप्रेतः ।

१७. अहम् **अनुमानं** करोमि यत्....

'अहम् ऊहां करोमि यत्','अहं चिन्तयामि यत्','अहं तर्कयामि यत्' इत्येवं स्यात् वाक्यस्यआनुपूर्वी । अनुमानपदस्य अर्थः पूर्वं विवृतः एव । तादृशः अर्थः अत्र न अपेक्षितः । न ह्यत्र हेत्वादिकं दृष्ट्वा व्याप्तिज्ञानपुरस्सरं पक्षे किमपि निश्चीयते । ऊह्यते, तर्क्यते, चिन्त्यते वा । अतः, तदनुगुणम् एव वाक्यं रचनीयम् ।

१८. कृपया मम **सहायं** करोतु मित्र !

’साहाय्यम्’ इति प्रयोक्तव्यम् । सहायः नाम सहकर्ता सहैव स्थितः वा । एतस्मिन् वाक्ये तु सहायस्य भावः कर्म वा अपेक्षितम् । तस्मिन्नर्थे ष्यञ् । ततः ’साहाय्यम्’ इति रूपम् ।

१९. एषः मम **साहाय्यकः** ।

’सहायकः’ इति पदेन एव इष्टसिद्धिः । सहायः नाम सहकर्ता । सहायः एव सहायकः । स्वार्थे कप्रत्ययः । तथा हि कोषः – ’अनुप्लवः सहायश्चानुचरोऽभिसरः समाः’ इति । (अमरः)

२०. अद्यतनं **गायनम्** अत्युत्तमम् आसीत् ।

’गानम्’ इति वक्तव्यम् । अत्र गानक्रिया अभिप्रेता । तन्नाम, गैधातोः भावे ल्युटि कृते ’गानम्’ इति रूपम् । गायनः नाम गानकर्ता । ’ण्युट् च’ इति (पा.सू. ३.१.१४७) इति सूत्रेण कर्त्रर्थे ण्युट् । कुशलः गायकः इति तस्य अर्थः । गायकगायनौ समानार्थकौ (गानकर्तारौ इत्यर्थः) ।

२१. तस्य पुस्तकस्य एका **प्रतिः** प्रेषणीया ।

’प्रतिकृतिः’ इति प्रयोक्तव्यं, शब्दान्तरं वा । ’प्रति’ इति अव्ययम् । तस्य प्रयोगे विभक्तिप्रत्ययस्य लुक् । अतः, विभक्तिप्रत्ययः न दृश्यते । अन्यच्च, प्रतिशब्दः प्रतिकृत्यर्थे न प्रयुक्तपूर्वः अपि । हिन्द्यादिभाषाप्रभावकारणतः एतादृशाः शब्दाः प्रयुज्यन्ते ।

२२. अष्टावधानकार्यक्रमे **पृच्छकाः** विविधान् प्रश्नान् पृच्छन्ति ।

’प्रच्छकाः’ इति प्रयोगः वरम् । ज्ञीप्सार्थकस्य प्रच्छधातोः कर्त्रर्थे ण्वुलि प्रच्छकः इति रूपम् । अत्र सम्प्रसारणस्य न क्वापि प्रसक्तिः । अतः, पृच्छकः इति रूपं न । ये तु प्रच्छधातोः ण्वुलि ’पृच्छकः’ इति रूपम् इति वदन्ति ते तु भ्रान्ताः । वर्तमाने ’पृच्छति’ इति यत् रूपं भवति, तस्य सादृश्यं मनसि निधाय ते तादृशं रूपं वदन्ति । लटि प्रथमपुरुषैकवचने तु विकरणप्रत्ययः शः । तस्य सार्वधातुकत्वम् । तस्मात्, ङिद्वद्भावः । (’सार्वधातुकमपित्’ इति सूत्रेण) ततः सम्प्रसारणम् । ण्वुल् तु आर्धधातुकम् । अतःम् तस्य न ङिद्वद्भावः । तस्मात् न सम्प्रसारणम् । केचन तु – पृच्छां प्रश्नं करोति इतय्स्मिन्नर्थे पृच्छाशब्दात् णिचि ण्वुलि ’पृच्छकः’ इति सिद्धम् इति वदन्ति ।

२३. अद्य **शारीरिकाध्यापकः** अनुपस्थितः अस्ति ।

'शारीरकाध्यापकः' इति, 'दैहिकाध्यापकः' इति वा वक्तव्यम् । शरीरस्य अयं शारीरः । ततः स्वार्थे कः । शरीरसम्बन्धी इत्यर्थः । शारीरकः अध्यापकः शारीरकाध्यापकः इति कर्मधारयः । 'शारीरिकः इति रूपम् अपि भवति । तेन निर्वृत्तम् इत्यर्थे ठक् । ठस्य इकः । तस्मात् शारीरिकपदस्य सिद्धिः । किन्तु, अयमर्थः अत्र न अभिप्रेतः । अतः, अपेक्षितस्य अर्थस्य ज्ञापनाय 'शारीरक'पदम् एव प्रयोक्तव्यम् । 'शारीरकीयम्' इति छप्रत्ययान्तम् अपि प्रयोक्तुं शक्यम् । 'दैहिकाध्यापकः' इति प्रयोगः शोभतेतराम् ।

२४. भवता **न्यायेन** मार्गेण गन्तव्यम् ।

'न्याय्येन' इति प्रयोक्तव्यम् ।

न्यायशब्दः पुंलिङ्गविशिष्टः कश्चन अस्ति । स तु न धर्मिपरः । अत्र तु मार्गस्य विशेषणत्वेन धर्मिपरः शब्दः अपेक्षितः । अतः, 'न्याय्य'पदं प्रयोक्तव्यम् । 'न्यायादनपेतः' इत्यादयः अर्थाः भवन्ति न्याय्यपदस्य । तथा हि भर्तृहरिप्रयोगः – 'न्याय्यात्पथः प्रविचलन्ति पदं न धीराः' इति ।

सुबन्ताः

२५. सः **निराशया** एवम् उक्तवान् ।

'निराशतया' इति वक्तव्यम् । निर्गता आशा यस्मात् सः निराशः । निराशस्य भावः निराशता । 'प्रकृत्यादिभ्यः उपसङ्ख्यानम्' इति तृतीयान्तस्य तस्य क्रियायाम् अन्वयः ।

२६. भवता **सावधानतया** पठनीयम् ।

भवता **सावधानं** पठनीयम् ।

भवान् **सावधानेन** पठेत् ।

'सावधानतया','सावधानम्','सावधानेन' इति त्रिधा अपि प्रयोगः युक्तः एव ।

अवधानेन सहितः सावधानः । तस्य भावः सावधानता । तस्य प्रकृत्यादित्वात् (प्रकृत्यादिगणे प्रवेशात्) तृतीयान्ततया क्रियायाम् अन्वयः । 'सावधानम्' इत्यत्र कर्मत्वेन क्रियायाम् अन्वयः । 'अवधानेन सह यथा स्यात् तथा' इति अर्थः । 'सावधानेन' इत्यत्र 'मनसा' इति पदम् अध्याहार्यम् । 'अवधानसहितेन मनसा' इति तात्पर्यं भवति । 'सावधानेन भोक्तव्यम्' इत्यादयः प्रयोगाः बहुधा श्रूयन्ते इत्यतः मनश्शब्दस्य अध्याहारः चिन्तितः । स्थितस्य गतेः चिन्तनार्थम् एषः मार्गः आश्रितः ।

सुबन्ताः

२७. भवता **सावधानेन** गन्तव्यं, न तु वेगेन ।

अत्र 'मन्दगत्या' इति, 'मन्दम्' इति वा प्रयोक्तव्यम् ।

मन्दगत्यर्थे अत्र सावधानशब्दप्रयोगः कृतः । तम् आशयं स्पष्टीकर्तुम् एव वेगस्य निषेधः कृतः । किन्तु, मन्दगत्यर्थे सावधानपदं न युज्यते । कश्चित् अवधानसहितः यदा भवति, तदा गतिः मन्दा भवेत् नाम । तथापि सावधानपदस्य तु मन्दगतिः इति अर्थः नास्ति । अतः, तस्य प्रयोगः अत्र औचित्यं न आवहति ।

२८. किं भोः **अपरूपदर्शनं** भवतः ।

'विरलदर्शनः भवान्' इति प्रयोक्तव्यम् ।

प्रादेशिकभाषाप्रभावकारणतः विरलार्थे अपरूपशब्दस्य प्रयोगः कृतः अत्र । तत् अयुक्तम् । अपगतं रूपं यस्मात् सः अपरूपः । तन्नाम, रूपहीनः । तादृशः अर्थः अत्र न अभिप्रेतः ।

सुबन्ताः

२९. राज्ञः धान्यागारे **यथेच्छं** धनम् अस्ति ।

'प्रभूतम्' इति प्रयोक्तव्यम् ।

अत्र धनस्य बाहुल्यम् इष्यते, न तु यथेष्टता । इच्छाम् अनतिक्रम्य यथेच्छम् । धनस्य सत्तायां कस्यापि इच्छायाः प्रसक्तिः नास्ति । क्वचित् 'यथेच्छम्','प्रभूतम्' इति उभयोः अपि प्रयोगः शक्यः । (सूक्ष्मः अर्थभेदः तु भवति एव)

यथा – सः प्रभूतं/यथेच्छं कार्यं करोति ।

अत्र पर्यायेण उभयोः अपि पदयोः प्रयोगे न विसङ्गतिः । एतावता तयोः पर्यायार्थकता न ।

यत्र यथेच्छशब्दः न सङ्गच्छते, तादृशं स्थलं तु उपरि दर्शितम् । यत्र प्रभूतपदस्य प्रयोगः न सङ्गच्छते, तादृशं स्थलं यथा – त्वं मम गृहे यथेच्छं वस ।

अतः, यथेच्छ-प्रभूतयोः नियतप्रयोगस्थलानि सन्ति, पर्यायेण प्रयोगोऽपि क्वचित् सङ्गच्छते एव । अतः, तयोः प्रयोगविषये सावधानता अपेक्ष्यते ।

सुबन्ताः

३०. भवतः आगमनेन मम गृहं **पुनीतं** जातम् ।

'पुनीतम्' इति अपशब्दः । 'पूतम्' इति प्रयोक्तव्यम् ।

पवनार्थकस्य पूङ्-धातोः क्तप्रत्यये पूतः इति रूपम् । एतस्मिन् एव अर्थे पवित्रशब्दोऽपि प्रयोक्तुं शक्यः ।

३१. **अद्यत्वे** जनाः धनैकपराः दृश्यन्ते ।

'अद्यत्वे' इति प्रयोगः न दोषाय ।

'आज् कल्' इत्यर्थे 'अद्यत्व'शब्दः प्रयुज्यते बहुधा । तत् असहमानाः केचन – 'अस्मिन् अहनि इत्यर्थकात् भावार्थकः त्वप्रत्ययः न दृष्टचरः, भावार्थे ट्युप्रत्ययात् अद्यतनः इत्येव साधु' इति वदन्ति । तत् असत् । 'अद्यत्वे' इति भाष्यकारैः एव निपातितं दृश्यते । 'अस्मिन् काले' इत्येवार्थः तस्य ।

भाष्यप्रयोगः यथा –

'पुराकल्प एवामासीत्.... । अद्यत्वे न तथा । वेदमधीत्य....' – पस्पशाह्निके प्रयोजनचिन्तनावसरे ।

सुबन्ताः

३२. अद्य **सृजनात्मक**प्रतिभा विरला जाता अस्ति ।

'सर्जनात्मकम्' इति वक्तव्यम् । 'सृजनम्' इति अपशब्दः । सृजधातोः ल्युटि गुणः तु दुर्वारः । गुणे कृते 'सर्जनम्' इति रूपम् ।

३३. अयं **श्रेष्ठतमः** पण्डितः ।

'श्रेष्ठतमः' इति साधु एव इति वदन्ति प्रसिद्धाः वैयाकरणाः श्रीमन्तः चारुदेवशास्त्रिवर्याः ।

अतिशयेन प्रशस्यः भवति श्रेष्ठः । 'प्रशस्यस्य श्रः' (पा.सू.५.३.६०) इति सूत्रेण प्रशस्यस्य श्रादेशः । इष्ठन्-प्रत्ययः 'अतिशायने तमबिष्ठनौ' (पा.सू.५.३.५५) इति सूत्रेण । प्रशस्यतमार्थे एव अत्र इष्ठन्-प्रत्ययः । एतादृशात् आतिशायनिकान्तात् आतिशायनिकः तमप् पुनः न भवति इति केचन अभिप्रयन्ति । चारुदेवशास्त्रिणां पङ्क्तिः तु एषा – "यदा तु प्रकर्षवतां पुनः प्रकर्षो विवक्ष्यते तदा आतिशायनिकान्तात् अपरः आतिशायनिकः प्रत्ययः भवत्येव इति वृत्तौ उक्तम् । तेन, श्रेष्ठतमः इति साधु" इति ।

॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

सुबन्ताः

३४. अद्य समाजे **जागृतिः** न दृश्यते ।

'जागर्या' इति प्रयोक्तव्यम् । जागृतिः इति अपशब्दः । 'जागर्तेरकारो वा' इति वार्तिकेन अकारः विकल्पेन । अकारे कृते 'जागरा' इति रूपम् । अकाराभावे शः । शे परतः सार्वधातुके यक् । 'जाग्रोऽविचिण्..' इति गुणः । ततः, 'जागर्या' इति रूपं सिद्धम् । क्तिनः अपवादत्वेन एषः विधिः अस्ति । अतः, जागृधातुः क्तिन्नन्तं रूपं नास्ति ।

३५. समाज**जागर्तिं** विना संस्कृतविकासः असाध्यः ।

'जागर्तिः' इत्यस्य परिहारः वरम् । 'जागरा' इति, 'जागर्या' इति वा प्रयोक्तव्यम् ।

'जागृधातोः क्तिन्नन्तं रूपं नास्ति' इति पूर्वम् उक्तम् एव । 'जागर्तिः' इत्यत्र क्तिच् वक्तव्यः । चारुदेवशास्त्रिणः शब्दापशब्दविवेके वदन्ति – 'जागर्तिरिति क्तिचि कथञ्चित् व्युत्पाद्यम् । प्रयोगस्तु जागर्तेः सुदुर्लभः' इति । अतः, जागर्तेः प्रयोगस्य परिहारः अपि वरम् एव ।

सुबन्ताः

३६. भवता **कतमं** पुस्तकम् इष्यते ?

'कतमम्' इति अशुद्धम् । 'कतमत्' इति वक्तव्यम् । कतमशब्दः 'डतमच्'प्रत्ययान्तः । नपुंसके तु 'अद्डतरादिभ्यः पञ्चभ्यः' (पा.सू. ५.१.२५) इति अद्डादेशः । ततः, कतमत् इति रूपम् । कतमच्छब्दस्य पुंलिङ्गरूपं 'कतमः' इति । तत् अकारान्तम् । पुंसि यः अकारान्तः भवति, सः नपुंसके अमन्तः भवति एव इति न ।

३७. **अन्यतमत्** उदाहरणं वदतु भोः ।

'अन्यतमत्' इति अपशब्दः । 'अन्यतमम्' इति प्रयोक्तव्यम् । यद्यपि अन्यतमशब्दः कतमशब्दः इव दृश्यते, तथापि सः कतमशब्दः इव डतमच्-प्रत्ययान्तः न । अव्युत्पन्नः सः डतमच्-प्रत्ययान्तार्थं बोधयति स्वभावात् ।

सुबन्ताः

३८. (अत्र चिकित्सार्थं धनं न स्वीक्रियते) ’**उचिता**’ चिकित्सा अत्र ।

अत्र ’उचित’शब्दः अस्थाने । ’निश्शिल्का’ इति प्रयोक्तव्यम् । ’उचित’शब्दः ’योग्यः’,’अर्हः’ इत्यादीन् अर्थान् बोधयति । ते च अर्थाः अत्र न अपेक्षिताः । शुल्कं विना या चिकित्सा सा भवति ’निश्शुल्का’ ।

३९. एषः धनिकः **उदारी** अस्ति ।

’उदारी’ इति अपशब्दः । ’उदारः’ इति प्रयोक्तव्यम् ।

उदारः स्वयं धर्मिपरः । औदार्यवान् इत्यर्थः । अतः तस्य धर्मिपरतां गमयितुम् अन्यः मतुबर्थकः प्रत्ययः न आवश्यकः ।

४०. यदि सर्वाणि **घटकानि** सम्यक् कार्यं कुर्वन्ति तर्हि संस्था वर्धते ।

’घटकानि’ इति प्रयोगः न दोषाय । शब्दान्तरम् अपि प्रयोक्तुअं शक्यम् । ‘Unit’ इत्यर्थं ज्ञापयितुम् अयं शब्दः प्रयुज्यते । ’सूत्रघटकम् इदं पदम्’ इत्यादयः प्रयोगाः श्रूयन्ते शास्त्रेषु । अत्र ’घटक’पदस्य सम्बन्धकल्पकम्, अङ्गम् इत्यादयः अर्थाः । तस्मात् ’घटक’पदं परम्परया Unit इति अर्थं बोधयितुम् अर्हति । यदि एतेन पदेन न तुष्टिः तर्हि पदान्तरं प्रयुज्यतां नाम ।

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

For downloading course-materials, login @
www.sanskritfromhome.in

Subscribe to our youtube channel @
vyoma-samskrta-pathasala

Buy our Samskrita-learning products @
www.digitalsanskritguru.com

Support our cause for Samskrita-Samskriti @
www.vyomalabs.in

vyoma
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.
All materials shared in our website are purely for the purpose of personal study.
Replication/reuse in any form without written permission from the organisation is prohibited.